# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – मार्च-एप्रिल् २०१९

**कक्षा**–आचार्य-२(SEM-4) **प्रश्नपत्रम्** – ५ **गुणाः** – ७०

**विषयः** – साहित्यम् (ऐच्छिकम्) **कोड- CE- 544** **समयः** – ११ तः २

**दिनाङ्कः** – ०३/०४/२०१९ **सन्दर्भग्रन्थः**– चम्पूरामायणम् (बालकाण्डम्)

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ निम्नलिखितयोः कस्यचिदेकस्य ससन्दर्भं प्रसङ्गपुरस्सरं व्याख्यां कुरुत ।** ०५

१. अथ सरसिजयोनेराज्ञया रामवृत्तं करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या ।
शुभमतनुत काव्यं स्वादु रामायणाख्यं मधुमयभणितीनां मार्गदर्शी महर्षिः ॥

२. इन्द्रनीला चलोदञ्चच्चन्द्रिका धवलस्मितः ।
वाचमूचे सुधाधारां मधुरां मधुसूदनः ॥

**प्रश्नः २ बालकाण्डानुसारेण क्षीरसागरे देवैर्दृष्टस्य भगवतो विष्णोः वर्णनं कुरुत ।** १०

अथवा

**ग्रन्थकर्तुः भोजराजस्य परिचयं लिखत ।**

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ निम्नलिखितयोः कस्यचिदेकस्य ससन्दर्भं प्रसङ्गपुरस्सरं व्याख्यां कुरुत ।** ०५

१. योगेन लभ्यो यः पुंसां संसारापेतचेतसाम् ।
नियोगेन पितुः सोऽयं रामः कौशिकमन्वगात् ॥

२. वंशस्पृशा हृदयहारिफलान्वितेन रामेरितेन सहसा सहसायकेन ।
स्नेहार्दितेन निरगादनुरागिणीव प्राणावलिर्हृदयतः पिशिताशनानाम् ॥

**प्रश्नः ४ रावणस्य प्रभावं ग्रन्थानुसारेण वर्णयत ।** १०

अथवा

**ताटकावृत्तान्तं वर्णयत ।**

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ निम्नलिखितयोः कस्यचिदेकस्य ससन्दर्भं प्रसङ्गपुरस्सरं व्याख्यां कुरुत ।** ०५

१. तां नदीं विबुधा लब्ध्वा नाकलोकमनीनयन् ।
तपस्यन्तीं गिरिगौरीं देवाय महते ददौ ॥

२. तदेनामेनसो मुक्तां प्रतिगृह्णातु गौतमः ।
इति तस्याश्रमं भेजे साकं रामेण कौशिकः ॥

**प्रश्नः ६ सगरवृत्तान्तं विशदेन वर्णयत ।** १०

अथवा

**चम्पूरामाणयमाश्रित्य त्रिशङ्कुवृत्तान्तं वर्णयत ।**

**॥ चतुर्थान्वितिः ॥** (Unit-4)

**प्रश्नः ७ निम्नलिखितयोः कस्यचिदेकस्य ससन्दर्भं प्रसङ्गपुरस्सरं व्याख्यां कुरुत ।** **०५**

१. अयं महात्मा तपसः प्रभावादारोपयामास दिवं त्रिशङ्कुम् ।
नीलाम्बरं निह्नुतराजवेषं वर्षानिशीथादविशेषवेषम् ॥

२. जग्राह जनकात्सीतां तातादेशेन राघवः ।
आम्नायशासनेनार्चां यजमानादिवानतः ॥

**प्रश्नः ८ चम्पूरामायणानुसारेण विश्वामित्रचरित्रं वर्णयत ।** **१०**

अथवा

**चम्पूरामायणस्य काव्यशास्त्रीयदृष्ट्या विवेचनं कुरुत ।**

**प्रश्नः ९ निम्नलिखितेभ्यः दशप्रश्नानाम् अतिलघूत्तराणि यच्छत ।** **१०**

१. चम्पूरामायणस्य रचयिता कः?
२. बालकाण्डे कति श्लोकाः सन्ति?
३. उर्मिला कस्य पत्नी?
४. 'कुशीलव'स्य कोऽर्थः
५. इन्द्रस्य सखा कः?
६. जनकस्य पुरोहितः कः?
७. कुशध्वजः कः?
८. दशरथः कुत्र निवसति?
९. 'चम्पू' अर्थात् किम्?
१०. रेणुकायाः वधः केन कृतः?
११. कस्याः नद्याः तटे अयोध्याऽस्ति?
१२. यज्ञविघ्नशान्त्यै कः रामम् अयाचत?
१३. कः गङ्गां मर्त्यलोकं नीतवान्?
१४. दैत्यानां जननी काऽस्ति?
१५. कस्य शापादहल्या पाषाणतामवाप?

०००